This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 655 विषय धर्मशास्त्र.

नाव. संन्यास पद्धति M88.

लेखक/लिपीकार बाळकृष्ण कुंभाळे (लिपिक).

पृष्ठ 37 काळ — पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथसंन्यासपद्धति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशाय नमः ॥ नारायणं नमस्कृत्य सच्चिदानंद मुक्तिदं
॥ विदुषां वीतरागाणां करोमि यति पद्धतिं ॥ १ ॥ अथ परमहंसा
श्रम सन्यासग्रहण विधिं व्याख्यास्यामः ॥ अनाश्रमी नातिष्ठेत
क्षणमेकमपि द्विजः ॥ आश्रमेन विना तिष्ठन् प्रायश्चित्ती भवेद्द्विजः
॥ २ ॥ अत्राधिकारी विज्ञेयो ब्राम्हणो नान्य वर्णजः ॥ ब्रम्हचा
री गृहस्थो वा वानप्रस्थो दुःखिताः ॥ ३ ॥ यस्यैतानि प्रसुप्तानि
जिह्वोपस्थोदरं गिर ॥ विरक्तः प्रव्रजेद्विप्रः सरक्तस्तु गृहे वसेत्
॥ ४ ॥ यदा सर्वपदार्थेषु वैराग्यं यस्य जायते ॥ अधिकारी स वि
ज्ञेयो इति शास्तातपोब्रवीत् ॥ ५ ॥ यदहरेव विरजेत्तदहरेव प्रव्रजे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्दितिश्रुतेः ॥ अथानधिकारी ॥ आरूढः पतितापत्यं कुनखीत्र्या
मद्दंतकः ॥ क्षयोक्षीणांगविकलो नच सन्यासमर्हति ॥ व्रात्यानाम
भिशस्तानां महापातकिनां तथा ॥ सत्वाचारविहीनानां सन्यासं
नैवकारयेत् ॥ अथ प्रयोगः ॥ चरेच्चत्वारि कृच्छ्राणि यावनार्थमना
श्रमी ॥ आश्रमीचेत्कृच्छ्रमेकं तेन सौयोग्यतां व्रजेत् ॥ शक्तश्चे
द्विभवे सति उद्गमयनाद्दे प्रशस्ते काले कस्यांचिद्रिक्तायां तिथौ सर्वप्राय
श्चितं विधिना कृत्वाऽन्यस्मिन्दिने सन्यासाधिकारार्थं प्रायश्चित्तं कृत्वा
तस्मिन्नेवदिने नित्यं कर्म कृत्वा विष्णुपूजनं वैश्वदेवं च कृत्वा प्राङ्मुखो

भूत्वा चम्य देशकालौ स्मृत्वा – अमुकशर्मणो मम करिष्यमाण
सन्यासयोग्यतासिध्यर्थं चतुःकृच्छ्रात्मकं कृच्छ्रमेकं वा प्रायश्चितं
प्रतिकृच्छ्रमेकैक गोनिष्क्रयामुकपरिमितद्रव्यद्वारा अहमाचरिष्ये
॥ इति संकल्पः पूर्वकं तद्द्रव्यं ब्राम्हणेभ्योदत्वाष्टौ श्राध्दानि कुर्यात् ॥
अथ अष्ट श्राध्दं ॥ दैवं चार्षं तथा दिव्यं मानुषं भूतपैतृके ॥ मातृकं
त्वात्मनश्चैते अष्टौ श्राध्दानि कारयेत् ॥ पिंडद्रव्याणि – यव – दू
र्वा – अक्षता – बदरीफल – दधि – घृत – मधु – लाजा – प्रभृतीनि सु
मंगलान्यन्यानि ॥ तिलार्थे यवाः ॥ तानि पूर्वाण्हे एवानुष्ठेयानि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांदी श्राध्द वेदघ्टौ श्राध्दानि कुर्यात् ॥ प्रतिश्राध्दं ब्राम्हण युग्मं ॥ वि
श्वेदेवौ द्वौ - एवमष्टादश ब्राम्हणा भवंति ॥ तानि अष्टौ श्राध्दानि
अष्टमीमारभ्य पौर्णिमास्यां तानि - अमावास्यां तानि वा ॥ संन्या
सग्रहणात्पूर्वदिने वा एकतंत्रेण कार्याणि ॥ प्रतिदैवं एकपिंड स्तदा
चतुर्विंशति पिंडाः भवंति ॥ केचिन्मते प्रतिदैवं पिंडद्वयं प्रथमः स
मंत्रको द्वित्तीयस्तूष्णीं तदा अष्टचत्वारिंशत्पिंडाः भवंति ॥ इति
ज्ञात्वा श्राध्द सामग्रीं संपादयेत् ॥ ततः नद्यादौ गत्वा यज्ञोप
वीतिना यवैः ऋजुकुशैः दूर्वाभिः वा देवतीर्थेनैकांजलिनाष्टौ श्रा

ध्ददेवतानां तर्पणं कार्यं ॥ तच्च स्वगृ - क्तप्रथमया द्वित्तीयया वाका
र्यं तदा ब्रम्हाणं तर्पयामि इत्येवं सर्वत्र ॥ ब्रम्हा स्तृप्यंतां - विष्णुस्तृप्य
तां - महेश्वरः स्तृ० - देवर्षयस्तृ० ब्रम्हर्षयस्तृ० क्षत्रर्षयस्तृ० वसव
स्तृ० रूद्रा स्तृ० आदित्यास्तृ० सनकस्तृ० सनंदनस्तृ० सनातनस्तृ
० पृथिव्यादि पंचभूतानि तृ० एकादश चक्षुरादि करणानि तृ० चतु
र्विधभूतग्रामा स्तृ० पितातृ० पितामहस्तृ० प्रपितामहस्तृ० माता
तृप्य० पितामही तृ० प्रपितामही तृ० आत्मा तृ० पिता तृ० पिता
महस्तृ० ॥९॥ इति श्राध्ददेवतानां तर्पणम् ॥ स्वगृहं आगत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ हस्तौ पादौ प्रक्षाल्याचम्य ॥ पूर्वाभिमुखः स्थित्वा प्राणानायम्य
देशकालौ संकीर्त्य - ममाशेषदुःखनिवृत्ति निरतिशयानंद प्राप्तिपर
मपुरुषार्थप्राप्तये परमहंसाश्रमसंन्यासस्वीकारार्थं श्रीपरमेश्व
रप्रीत्यर्थं अष्टौ श्राद्धान्येकतंत्रेणाहं करिष्ये - समस्तसंपदित्या
दिभिः प्रदक्षणीकृत्य ब्राम्हणान्दंडवत्प्रणम्य प्रार्थयेत ॥ कुरुष्वसं
न्यासमिति ब्रूतयूयं द्विजोत्तमाः ॥ अनुज्ञां प्राप्य युष्माकं सिद्धिं यास्या
मि शाश्वतीं ॥ गर्भवासभयाद्भीतस्तथातापत्रयादपि ॥ गुहां प्र
वेष्टुमिच्छामि परंपदमनामयम् ॥ २ ॥ इति प्रार्थनांते ओं कुरुष्वेति

द्विजैरुक्ते कर्ता सर्वत्र द्विजकरे ऋजु दूर्वायुग्मं दर्भयुग्मं वायवसहि
तं दद्यात् ॥ सत्यवसुसंज्ञक विश्वेदेवार्थे भवद्भ्यां क्षणः प्रसादनी
यः ॥ यथाक्रमं युगपद्द्वौ ब्राम्हणावामंत्रयेत् ॥ सर्वं समेनैव नांदी
मुखवत् ॥ प्रथमे देवश्राद्धे ब्रम्हविष्णुमहेश्वरार्थे भवद्भ्यां क्षणः
प्रसादनीयः ॥१॥ द्वितीये ऋषिश्राद्धे देवर्षिब्रम्हर्षिक्षत्रर्ष्यर्थे भव
० ॥२॥ तृतीये - मनुष्यश्राद्धे सनकसनंदन सनातनार्थे भव० ॥
४॥ दिव्यश्राद्धे वसुरुद्रादित्यार्थे भव० ॥३॥ चतुर्थे अस्याः पंक्तेः उप
रि विस्मृत्या लिखितम् मनुष्यश्राद्धं ॥४॥ पंचमे भूतश्राद्धे पृथि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यादिपंचमहाभूतैकादशाचक्षुरादींद्रियचतुर्विधभूतग्रामार्थेभव०
॥५॥ षष्ठेपितृश्राध्देपितृपितामहप्रपितामहार्थेभव०॥६॥
सप्तमे मातृश्राध्दे मातृपितामहीप्रपितामहार्थेभव० ॥७॥अष्ट
मे आत्मश्राध्दे आत्मपितृपितामहार्थेभव०॥८॥एवमष्टादश
ब्राम्हणान्निमंत्र्यादिग्बंधनंकुर्यात्॥वेतालाश्चपिशाचाश्चराक्ष
साश्चसरीसृपा॥अपसर्पंतुतेसर्वे यावत्श्राध्दं करोम्यहं॥इति
यवाक्षतैर्भूतानुत्सार्य उदक्संस्थानिच्चतुरस्त्रनवमंड
लानिकृत्वा मंडलदेवताभ्योनमः इतिगंधाक्षतपुष्पैरभ्यर्च्यनि

वमंडलस्यब्राम्हण—दक्षिणादिक्रममारभ्य सत्यवसुसंज्ञकविश्वे
देवाः नांदीमुखाः इदंवः पाद्यं- सुपाद्यं- शन्नोदेवी० इतियुगयद्वाभ्यां
पादप्रक्षालनं ॥ततः प्रथमेदेवश्राध्दे ब्रम्हविष्णुमहेश्वराः इदंवः पा
द्यं- सुपाद्यं- शन्नोदेवी० ॥द्वितीयेऋषिश्राध्दे देवर्षिब्रम्हर्षिक्षत्र
र्षयः इदंवः एवंसर्वत्र॥तृतीये दिव्यश्राध्दे वसुरुद्रादित्याः इदंवः॥
चतुर्थैमनुष्यश्राध्दे सनकसनंदनसनातनाः इदंवः ॥पंचमेभूतश्रा
ध्दे पृथिव्यादिपंचमहाभूतैकादशाचक्षुरादींद्रियचतुर्विधभूतग्रा
माः इदंवः ॥षष्ठेपितृश्राध्देपितृपितामहप्रपितामहाः इदंवः ॥सप्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे मातृश्राद्धे मातृपितामही प्रपितामह्यः इदंवः ॥ अष्टमे आत्मश्राद्धे
आत्मपितृपितामहाः इदंवः ॥ एवं पादप्रक्षालनंदत्वास्वयमपिपादौ
प्रक्षाल्याचम्य ॥ ततः अष्टादशब्राम्हणान्प्राङ्मुखानुदक्संस्थानुप
वेश्यासनादिदत्वा स्वयं उदङ्मुखोपविश्य ॥ सत्यवसुसंज्ञकानां विश्वे
षांदेवानांइदमासनंसु० आस्यतां धर्मोसि आपः सु० अत्रश्राद्धे क्ष
णोक्रीयेतां तथा प्राप्नोतां भवंतौ प्राप्नुवावः ॥ एवं युगपद्द्वाभ्यांदेवाभ्यां
आसनंदत्वा – अष्टश्राद्धदेवतानांतथैवदद्यात् ॥ प्रथमेदेवश्राद्धे
ब्रम्हविष्णुमहेश्वराणांइदमासनं – सुखासनं – आस्यतां ॥ १ ॥

द्वितीये ऋषिश्राद्धे देवर्षिब्रम्हर्षिक्षत्रर्षीणांइदमासनं ॥ २ ॥ पूर्व
वत् ॥ तृतीयेदिव्यश्राद्धे वसुरुद्रादित्यानांइदमासनंसु० ॥ ३ ॥
चतुर्थे मनुष्यश्राद्धे सनकसनंदनसनातनानांइदमासनंसु०
॥ ४ ॥ पंचमे भूतश्राद्धे पृथिव्यादिपंचमहाभूतैकादशचक्षु
रादींद्रिय चतुर्विधभूतग्रामाणांइदमासनंसु० ॥ ५ ॥ षष्ठेपितृ
श्राद्धे पितृपितामहप्रपितामहानांइदमासनंसु० ॥ ६ ॥ सप्तमेमा
तृश्राद्धे मातृपितामहीप्रपितामहीनांइदमासनंसु० ॥ ७ ॥ अष्ट
मे आत्मश्राद्धे आत्मपितृपितामहानांइदमासनंसु० ॥ ८ ॥ एवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसनादिदत्वार्घ्यावाहनवर्जं गंधादिनार्चयेत ।। सत्यवसु संज्ञकाः विश्वेदेवाः अत्रः सु अत्रः एषः गंधः सुगंधः इमानि पुष्पाणि सु० एषः धूपः सु० एषः दीपः सु० इदं आच्छादननिष्क्रयद्रव्यं सु० आच्छा० ए तान्यत्र गंधपुष्पधूपदीपाच्छादनानि स्वाहा संपद्यंतां नमम ।। प्रथमे देवश्राध्दे ब्रम्हविष्णुमहेश्वराः अत्रः सु० पूर्ववत् ज्ञेयं ।। इदं आच्छादनानि स्वाहा संपद्यंतां नमम ।। द्वितीये ऋषिश्राध्दे देवर्षिब्रम्हर्षि क्षत्रर्षयः अत्रः सु० इदमाच्छादनानि० नमम० ।। २ ।। तृतीये दिव्यश्राध्दे वसुरुद्रादित्याः अत्रः सु० इदमाच्छादनानि० नमम० ।। ३ ।।

चतुर्थे मनुष्यश्राध्दे सनक सनंदन सनातनाः अत्रः सु अत्रः इदमाच्छादनानि० नमम ।। ४ ।। पंचमे भूतश्राध्दे पृथिव्यादिपंचमहाभूतैकादशाच्चक्षुरादींद्रियचतुर्विधभूतग्रामाः अत्रः सु अत्रः इदमाच्छादनानि० नमम ।। ५ ।। षष्ठे पितृश्राध्दे पितृपितामहप्रपितामहाः अत्रः सु अत्रः इदमाच्छादनानि० नमम ।। ६ ।। सप्तमे मातृश्राध्दे मातृपितामहीप्रपितामह्यः अत्रः सु अत्रः इदमाच्छादनानि० नमम ।। ७ ।। अष्टमे आत्मश्राध्दे आत्मपितृपितामहाः अत्रः सु अत्रः इदमाच्छादनानि स्वाहा संपद्यंतां नमम ।। ८ ।। इदमर्चनं संपूर्णमस्तु — अस्त्विति द्विजोक्तिः ।। ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षामग्रेमंडलानिचतुरस्त्राणिकृत्वापात्राण्यासाद्यप्रोक्ष्य घृतधारांकृत्वा
।। अन्नादिपरिवेश्य ।।रेखाकरणाग्नौकरणाभावः।।गायत्र्यान्नपा
त्राणि संप्रोक्ष्य ।। पृथिवीतेपात्रंद्यौरपिधानंब्राम्हणस्यमुखेइदमन्नं
परिष्टं परिवेष्यमाणं आतृप्तेस्वाहानमम ।। ब्राम्हणं अंगुष्ठमूलेनाव
गाह्यान्नंस्पृष्ट्वातत्पात्रंब्राम्हणायनिवेद्य ।। सत्यवसुसंज्ञकेभ्योवि
श्वेभ्योदेवेभ्यः दत्तं दास्यमानंचनममेतिदूर्वाक्षितसहितंजलं देवती
र्थेनत्यजेत् ।। एवंप्रथमे देवश्राद्धे पृथिवीतेपात्रं॰ सर्वत्रपूर्ववत्
।। इदंब्रम्हविष्णुमहेश्वरेभ्योदेवेभ्योदत्तं॰ ।।१।। द्वितीयेऋषिश्राद्धे

पृथिवी॰ इदंदेवर्षिब्रम्हर्षिक्षत्रर्षिभ्योदत्तं॰ ।।२।। तृतीयेदिव्यश्राद्धे
पृथिवी॰ इदंवसुरुद्रादित्येभ्योदत्तं ।।३।। चतुर्थेमनुष्यश्राद्धे पृथिवी॰
इदंसनक सनंदन सनातनेभ्योदत्तं ।।४।। पंचमेभूतश्राद्धे पृथिवी॰
इदंपृथिव्यादिभ्यः पंचमहाभूतेभ्यो एकादशेभ्यश्चक्षुरादीइंद्रियेभ्य
श्चतुर्विधेभ्योभूतेभ्य ग्रामेभ्योदत्तं ।।५।। षष्ठेपितृश्राद्धे पृथिवी॰
इदं अमुकगोत्रेभ्यः अस्मात्पितृपितामह प्रपितामहेभ्यो अमुकशर्मे
भ्योदत्तं ।।६।। सप्तमेमातृश्राद्धे पृथिवी॰ इदं अमुकगोत्राभ्यः अ
स्मन्मातृपितामहीप्रपितामहीभ्यो अमुकामुकदेवीभ्योदत्तं ।।७।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमे आमश्राध्दे पृथिवी० गोत्रेभ्यः आत्मपितृपितामहेभ्यः आत्म
नाम पितृनामपितामहनामपूर्वक अमुकामुकशर्मभ्योदत्तं ॥८॥
ततः संकल्पं कुर्यात् ॥ प्रजापते - रुपिणी - नैवेद्यं - ॥ एको विष्णु० अ
नेन ब्राह्मण भोजनेनाष्टश्राध्दे देवतात्मको भगवान् वासुदेवः प्री
यतां न ममेत्यक्षतोदकं विसृज्य ब्राह्मणानां अपोशानं दत्वा अमृ
तमस्त्वित्युक्त्वा प्राणाय स्वाहेत्यादि पंचाहुतिमंत्रान्पठेत् ॥ तेच ब्रा
ह्मणाः बलिदानवर्जं भुंजीयः ॥ अथवा आमान्न पक्षे ॥ आमान्नं
तन्निष्क्रयद्रव्यं वा अष्टदशपात्रेषु निधाय दूर्वाक्षितोदकं गृहीत्वा

इदं आमान्नं द्रव्यं वा आतृप्तेः स्वाहा न मम ॥ इदं सत्यवसुसंज्ञकेभ्यो दे
वेभ्यो न ममेति त्यजेत् ॥ एवमेग्र अष्टस्थानेषु पूर्ववदूहः कार्यः ॥ त
तो अपेक्षितमिति जपेत् ॥ ततो मधुवातेतित्यृचं पठित्वा द्विजान्
॥ तृप्तान्विज्ञात्वाप्याचांतेषु विप्रेषु तांबुलादि दत्वाक्षमा - - - - प्याच
म्य पिंडस्थाने प्राङ्मुखो पविश्य गोमयेनोपलिप्य प्राणानायम्य एवंगुण
० तिथौ नांदीमुखमष्टश्राध्दांगभूतं पिंड प्रदानमहं करिष्ये ॥ इति संकल्प्य
अपहता असुरेति मंत्रानृत्या दक्षिणारंभाः प्रागायताः उदक्संस्थाः
अष्टौ रेखाः कृत्वा ताः आपः अभ्युक्ष्य सर्वासु प्रागग्रान्कुशान् नातिदीर्घा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदूर्वान्वा आस्तीर्य तासुरेखासु दक्षिणरेखामारभ्यप्रतिरेखांपिंडत्रया र्थं षट्पिंडार्थंवास्थलत्रयेप्रा संस्थंजलंदद्यात ॥ तत्रजीवत्पितृमातृकस्तु तोपरित्यज्यदद्यात ॥ यथा प्रथमे देवश्राध्दे ब्रम्हनपिंडस्थानेअवने नीक्ष्व – विष्णो पि० महेश्वर पि० ॥१॥ द्वितीये ऋषिश्राध्दे देवर्षयः पि० ब्रम्हर्षयः पि० क्षत्रर्षयः पि० ॥२॥ तृतीये दिव्य श्राध्दे वसवः पि० रूद्राः पि० आदित्याः पि० ॥३॥ चतुर्थेमनुष्यश्राध्दे सनकः पि० सनंद नः पि० सनातनः पि० ॥४॥ पंचमेभूतश्राध्दे पृथिव्यादिनिपंचम हाभूतानिपि० एकादश चक्षुरादींन्द्रियानि पि० चतुर्विध भूतग्रामाः

पि० ॥५॥ षष्ठे पितृश्राध्दे गोत्र अस्मात्पितः अमुकशर्मन् वसुरूप पि० गोत्र अस्मात्पितामह अमु० रुद्र० पि० गोत्र अस्मत्प्रपिताम ह अमु० आदि० पि० ॥६॥ सप्तमे मातृश्राध्दे गोत्रे अस्मन्माता अमुकीदेवीदे पि० गोत्रे अस्मात्पितामही अमु० पि० गोत्रे अस्म त्प्रपितामही अमु० पि० ॥७॥ अष्टमे आत्मश्राध्दे अस्मदमुक शर्मन् पि० गोत्र अस्मात्पितः अमु० पि० गोत्र अस्मात्पितामह अमुकशर्मन पि० ॥८॥ ततः पिंडदानं ॥ पूर्वोक्तद्रव्यमेकीकृ त्य चतुर्विंशतिपिंडानष्टचत्वारिंशत्पिंडान्वा कृत्वाउक्तरेखासु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतजलसेकस्थले एकैकस्यै देवतायै पिंडः एकद्वयं वा दद्यात् ।। ब्राम्हण
भोजनावशिष्ठमन्नमेकीकृत्य पिंडान्दद्यादिति केचिन्मते ।। यथाप्रथ
मे देवश्राद्धे ब्रम्हणे अयंपिंडः स्वाहा नमः ।। द्वितीयं पिंड श्वेतस्याग्रे सोपि
तूष्णीं देवः एवं सर्वत्र ।। विष्णवे अयं पि० महेश्वराय अयं पि० ।।१।।
द्वितीये ऋषिश्राद्धे देवर्षिभ्यः अयं पि० ब्रम्हर्षिभ्यः अयं पि० क्ष
त्रर्षिभ्यः अयं पि० ।।२।। तृतीये दिव्यश्राद्धे वसुभ्यः अयं पि० रु
द्रेभ्यः अयं पि० आदित्येभ्यः अयं पि० ।।३।। चतुर्थे मनुष्यश्राद्धे
सनकाय अयं पि० सनंदनाय अयं पि० सनातनाय अयं पि० ।।४।।

।।१०।।

पंचमे भूतश्राद्धे पृथिव्यादिभ्यः भूतेभ्यः अयं पि० एकादश चक्षुरादीन्द्रि
येभ्यः अयं पि० चतुर्विधेभ्यो भूतग्रामेभ्यः अयं पि० ।।५।। षष्ठे पितृ
श्राद्धे गोत्राय अस्मात्पित्रे अमुकशर्मणे वसुरुपाय अयं पि० गोत्राय
अस्मात्पितामहाय अमु० रुद्ररूपाय अयं पि० गोत्राय अस्मत्प्रपिताम
हाय अमु० आदित्यरुपाय अयं पि० ।।६।। सप्तमे मातृश्राद्धे गोत्रा
यै अस्मन्मात्रे अमुकिदेवीदायै वसु० अयं पि० गोत्रायै अस्मात्पि
तामह्यै अमु० रुद्ररुपायै अयं पि० गोत्रायै अस्मत्प्रपितामह्यै अमु०
आदित्यरुपायै अयं पि० ।।७।। अष्टमे आत्मश्राद्धे गोत्राय स्वात्मने अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुकशर्मणे अयंपि० गोत्राय अस्मात्पित्रे अमु० अयंपि० गोत्राय अस्मत्पि
तामहाय अमुकशर्मणे अयंपिंड० ॥८॥ ततः पूर्ववत्संबोधनमु
क्त्वा पिंडोपरि पुनर्जलं दद्यात् ॥ ब्रम्हन् पिंडोपरि अवनेनीक्ष्व ॥
इत्यादिक्रमेण ज्ञेयं ॥ ततः गंधादिनापिंडान्संपूज्य नमस्कृत्य ॥ तद्वि
ष्णोः परमं० ततो आमा वाजस्येति पिंडानुधृत्य ॥ यस्यस्मृत्या इति
अनेन अष्टश्राद्धानुष्ठानेन तेन श्रीभगवान्विष्णुः प्रीयतामिति ज
लं उत्सृज्य ॥ ब्राम्हणेभ्यो दक्षिणास्थाने द्राक्षामलकयवमूल नि
ष्क्रयत्वेन द्रव्यं दातुमहमुत्सृजे इत्यनेन दक्षिणादिकं दत्वा ॥ आ

॥११॥

चम्य प्राङ्मुखः ॥ एवंमु० तिथौ संन्यासं कर्तुं गणपतिपूजनं पु
ण्याहवाचनं स्वशाखोक्तविधिनाहं करिष्ये तत्कृत्वा यथावि
कृत्विग्भिः सह भुंजीतेति तद्दिनकृत्यं ॥ अथद्वितीयदिनकृत्यं ॥ अ
थवा शरीरे व्यग्रता चेत्तस्मिन्नेव दिने कुर्यात् ॥ द्वितीये न्हि चेत्प्रा
तः नित्यकर्म विधाय शिखार्थं पंचसप्त वा केशान्स्थापयित्वा कंठा
दुपरि केशश्मश्रुलोमादीनां कक्षोपस्थवर्जं वपनं कृत्वा नखकृत
नं च कृत्वा यथाविधि स्नात्वा धौते वाससी परिधाय माध्यान्हसं
ध्यादिकं संपाद्य कौपीनाच्छादनाद्य युक्तं आत्मनः स्वाचार्याय द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षीणार्थंहोमार्थंचद्रव्यंपृथक्कृत्वासतिविभवेपुत्रदाराश्रितादिभ्यो
धनादिविभज्यभागंदत्वाधनैःसंतर्प्यस्वभागधनंसंन्यासदात्रेगु
रवेनिवेद्यतदनुज्ञयासर्व — भ्योदद्यात्॥असतिविभवेस्वात्मा
नमेवकेवलंनिवेदयेत्॥अथदेवतायतनेअग्न्यागारेनदीतीरेगो
ष्ठेअरण्येशुचौदेशेवा॥आकाशायकौपीनादिहोमद्रव्यंवैशावदं
डंसकल्माषंदृढमच्छिद्रंयोनिरहितंअदग्धंसत्वचांशीर्षप्रमाणंललाट
नांभ्रूप्रमाणंवादंडमकृशमस्थूलंसमूलोत्पाटितांविप्रानीतंसमपर्व
ग्रंथियुग्मांसमुद्रकंमूलाद्विगुणाग्रंपरशुंशंखमुद्रान्विताग्रंसुरभि

पंकजमुद्रान्वितमध्यंनागमुद्रान्वितमूलंमनोहरंसंपाद्य॥शंखोदके
नाष्टोत्तरशतवारंप्रणवेनपुरुषसूक्तेनचकेशवादिनाममंत्रैःअभि
षिच्यसंस्थापयेत्॥स्मृत्यर्थसारे॥दंडंजलपवित्रंचशिक्यंपात्रंकमंड
लुं॥कौपीनमासनंक — च्छादनंपादुकादि — ॥इतिसर्वसंस्थाप्राङ्मुखः
स्थित्वाचम्यप्राणानायम्यदक्षिणजानुनि — — — वामहस्तंकृत्वातत्र
कुशपवित्रद्वयंनिधायन्युब्जेनदक्षिणहस्तेनापिधानलक्षणांब्रम्हांज
लिंकृत्वामनसाजयेत्ब्रम्हयज्ञवत्॥ओंब्रम्हणेनमः॥१॥ओंविष्ण
वेनमः॥२॥ओंरुद्रायनमः॥३॥ओंइन्द्रायनमः॥४॥ओंसूर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनमः ॥५॥ ओं सोभाचनमः ॥६॥ ओंप्रजापतयेनमः ॥७॥ ओं
आत्मनेनमः ॥८॥ ओंअंतरात्मनेनमः ॥९॥ ओंपरमात्मनेनमः
॥१०॥ ओंज्ञानात्मनेनमः ॥११॥ ओंविज्ञानात्मनेनमः ॥१२॥
इतिद्वादशनाममंत्रा ॥त्रिर्जपित्वा सक्तुमुष्टित्रयंगायत्र्याभिमंत्र्य
प्रणवेन प्राश्याचम्य नाभौकरंदत्वाभिमंत्रयेत् ॥ ओंआत्मनेनमः
स्वाहा ॥१॥ ओं अंतरात्मनेनमस्वाहा ॥२॥ ओं परमात्मनेनमः
स्वाहा ॥३॥ ओं प्रजापतयेस्वाहा ॥४॥ इत्येतैश्चतुर्भिर्नाममंत्रैःना
भिमंत्रयेत् ॥ ततः पयोदधिपिप्पिल्येकीकृत्यप्रसृत्याप्रणवेनवक्ष्यमाण

मंत्रैश्चात्रिवारंपिबेत् ॥ ओंत्रिवृदसित्रिवृतेत्वेतिप्रथमं ॥ ओंप्रवृदसि
प्रवृतेत्वेतिद्वितीयं ॥ ओंविवृदसिविवृतेत्वेतितृतीयं ॥ अलाभेजल
मेवात्रिः प्राश्य ॥ पुनः आपः ॥ आपः पुनंतु पृथिवीपृथिवीपूतापुना
तुमां पुनंतुब्रह्मणस्पतिः ब्रह्मपूतापुनातुमाप्रतिग्रहः स्वाहेत्यनेन
मंत्रेणाचम्य हस्तौपादौप्रक्षाल्याचम्य प्राङ्मुखः उपविश्यप्राणा
यामत्रयंकृत्वायथाशक्तिगायत्रीजपंकुर्यात् ॥ उपवासपरोभवेत्
॥ ततः सूर्यास्तमयात्प्राक् ब्रह्मान्वाधानंकुर्यात् ॥ यथा ॥ ओं ता
न्निश्चेदाहवनीये ॥ स्मार्ताग्निश्चेदावसथ्ये ब्रह्मचारीचे ल्लौकिकाग्नौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ निरग्नीर्विधूरश्चपृष्ठोदिवीतिविधानंकृत्वा तस्मिन्नेवाग्नौ कुर्यात् ॥
पृष्ठोदिवीतिविधानमुच्यते ॥ स्थंडिले पंचभूसंस्कारान्कृत्वा श्रोत्रियगृह
दग्निंत्याहृत्य अन्वग्निरूपसामितिमंत्रेणस्थंडिलादाग्नेयांदिशिनिधाय
॥ पृष्ठोदिवीतिमंत्रेणस्थंडिलेऽग्निंस्थाप्य ॥ तां सवितुर्व० विश्वानिदेव०
इतिमंत्रेण समिंधननिक्षेपणेनाग्निं प्रज्वालयेदेवं सिद्धेग्नौ स्वस्वाग्नौ
विधिवदाज्यंसंस्कृत्योद्वास्यपवित्राभ्यामुत्पूयावेक्षणांतं कृत्वास्रुचौस्रुवे
णचतुर्गृहीतमाज्यंगृहीत्वा समिद्धेऽग्नौ ॥ ओं भूः स्वाहा इदंपरमात्मनेनम
म ॥ इत्येकाहुतिंजुहोत्येतद्ब्रह्मान्वाधानं इदं ज्ञातव्यं ततः सायंसंध्यामुपा

स्य ॥ सामिक्श्चेदग्निकार्यसंपाद्यहोमानंतरं इदंविष्णुर्विचक्रमे इतिमंत्रेणा
ग्न्युपस्थानंकृत्वाग्नेरुत्तरतोदर्भानास्तीर्य- तेषु होमसाधनद्रव्याणिदंडव
स्त्रादिपात्राणिस्थापयेत् ॥ ततोग्नेर्दक्षिणतोदर्भानास्तीर्य तत्रकृष्णाजि
नंच्यांतर्धायवस्त्रेणाच्छाद्य तत्रासीनोगायत्रीजपविष्णुपूजनहरिकीर्त
नस्तोत्रादिपठेत्-रात्रौजागरणादि कुर्यात् ॥ ततः ब्राह्ममूहूर्तौ प्रागपर
रात्रौस्नानंकृत्वादुर्बलश्चेत् भस्मस्नानंकृत्वा पूर्वस्थापितेग्नौहोमादिकर्म
कृत्वा कुर्यात् ॥ अग्नेपश्चादुपविश्या-चम्यप्राणानायम्य एवंगुण० तिथौ
परमहंससन्यास करिष्यमाण अमुकशर्माहंसंन्यासांगत्वेनविहितहोमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करिष्ये ॥ इति संकल्प्य स्वशाखोक्तविधिना कुर्यात् ॥ तत्र देवताभिध्यानं ॥ प्र
जापतिं- इन्द्रं- अग्निं- सोमं- आज्येन- पुनः ॥ इन्द्रादिचतुष्टयमग्निमु
खादि त्रयं ॥ प्रायासादिद्वादशाकं ॥ प्राणादिपंच ॥ एता आज्येन ॥ विष्णुंस
हस्रशीर्षेति षोडशऋग्भिः प्रत्यृचं प्रतिद्रव्यं एकैकया हुत्वा समिच्चर्वाज्यैः
पुनः प्राणादि द्वाविंशतिदेवताः ॥ अग्न्यादिषट्कं प्रजयन्ती ॥ एता आज्येन स्वि
ष्टकृतं सर्वद्रव्यशेषेण • नवानादिष्टदेवताः आज्येन ॥ एता अंगप्रधा
नार्थदेवताः अस्मिन्कर्मण्यहं यक्ष्ये ॥ ततो ब्रम्हवर्णासनादि कुशकं
डिकां कुर्यात् ॥ आज्यं वैष्णवं चरुं श्रपयित्वाज्यभागांतं कृत्वा ॥ ओं

भूर्भुवः स्वरिति व्याहृतीं जपित्वाप उपस्पृश्य होमं कुर्यात् ॥ आज्येन स्रु
वेण जुहुयात् ॥ ओं इन्द्राय स्वाहा- इदं इन्द्राय न मम ॥ ओं प्रजापतये स्वा
हा- इदं प्रजापतये न मम ॥ २ ॥ ओं विश्वेभ्यो देवेभ्यः स्वाहा- इदं विश्वे
भ्यो देवेभ्यो न मम ॥ ३ ॥ ओं ब्रम्हणे स्वाहा- इदं ब्रम्हणे न मम ॥ ४ ॥ इ
त्याहुति चतुष्टयं हुत्वाग्निमुखाहुतित्रयं जुहुयात् ॥ ओं अग्नये स्वाहा
- इदमग्नये न मम ॥ १ ॥ ओं सोमाय स्वाहा- इदं सोमाय न मम ॥ २ ॥ ओं
अग्नये स्वाहा- इदमग्नये न मम ॥ ३ ॥ इत्याहुतित्रयं हुत्वा द्वादशाहुतीर्जु
हुयात् ॥ ओं प्रायासाय स्वाहा- इदं प्रायासाय न मम ॥ १ ॥ ओं आयास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्वाहा-इदंआयासायनमम॥२॥ ओंवियासायस्वाहा-इदंवियासायन
मम॥३॥ ओंसंजासायस्वाहा-इदंसंजासायनमम॥४॥ ओंउद्यासायस्वा
हा-इदंउद्यासायनमम॥५॥ ओंअवयासायस्वाहा-इदंअवयासायनम
म॥६॥ ओंशुचेस्वाहा-इदंशुचेनमम॥७॥ ओंशोकायस्वाहा-इदंशो
कायनमम॥८॥ ओंतपत्यैस्वाहा-इदंतपत्यैनमम॥९॥ ओंतपतेस्वाहा
-इदंतपतेनमम॥१०॥ ओंब्रम्हहत्यायैस्वाहा-इदंब्रम्हहत्यायैनमम॥११॥
ओंसर्वस्मैस्वाहा-इदंसर्वस्मैनमम॥१२॥ इत्येता:॥ ओंप्राणायस्वाहा-इ
दंप्राणायनमम॥१॥ ओंअपानायस्वाहा-इदंअपानायनमम॥२॥ ओं

॥१६॥

व्यानायस्वाहा-इदंव्यानायनमम॥३॥ ओंउदानायस्वाहा-इदंउदानायनम
म॥४॥ ओंसमानायस्वाहा-इदंसमानायनमम॥५॥ इतिपंचाहुतिंहु
त्वा॥ सामिधमाघिधार्य पुरूषसूक्तेनप्रत्यृचंविष्णुंशोडशाहुतिभिर्जुहुयात्
॥ ओंसहस्त्रशीर्षा० गुलंस्वाहाइदंविष्णवेनमम॥१॥ ओंपुरुषएवे० इतिस्वा
हाइदंविष्णवेनमम॥२॥ ओंततोविरा० पुरःस्वाहाइदंविष्ण०॥३॥ ओंत्रिपा
एतावानस्य० इदंवि०
दूर्ध्व० अभिस्वाहाइदंवि०॥४॥ ततोविरा०पुरःस्वाहाइदंवि०॥५॥ ओंतस्मा
द्यज्ञात्सर्व० ऋचःस्वाहाइदंवि०॥६॥ ओंतस्माद्यज्ञात्सर्वहुतऋचःयतस्वा
हा० इदंविष्ण०॥७॥ ओंतस्मादश्वा अ० वयःस्वाहाइदंवि०॥८॥ ओंतयज्ञं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बर्हिषि० श्चषेस्वा० इदंविष्ण० ॥९॥ ओंयत्पुरुषं० व्येते स्वा० इदंविष्णवे० ॥१०
॥ ओंब्राम्हणोस्य० यत्तस्वा० इदंवि० ॥११॥ ओंचन्द्रमा मनसो० यत्तस्वा०
इदंवि० ॥१२॥ ओंनाभ्याऽआ० पन्स्वाहा इदंवि० ॥१३॥ ओंयत्पुरुषेण०
ध्दवि: स्वाहाइदंवि० ॥१४॥ ओंसप्तास्यास० पशुंस्वा० इदंवि० ॥१५॥ ओं
यज्ञेन० देवा: स्वाहा इदंविष्णवे नमम ॥१६॥ तत: चरूं अभिधार्य पुन:श्रो
डशाभिर्ऋग्भि: चरुणाहुत्वा पुनराज्येनशोडशाभिर्ऋग्भि: जुहुयात् - एवंपृथक्
पृथक् जुहुयात् ॥ तत: आज्येनविरजाहोमं कुर्यात् ॥ ओंप्राणापानव्यानो
दानसमानामेशुध्यंतां ज्योतिरहं विरजाविपाप्मा भूयासँ स्वाहा ॥ इदं

॥१७॥

प्राणादिभ्यो नमम ॥१॥ ओं वाङ्मनश्चक्षुश्रोत्राजिव्हाघ्राणरेतोबु
ध्याकूति: संकल्पामेशुध्यंतां ज्योति० स्वाहा इदं वागादिभ्यो नमम ॥२॥
ओंत्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनिमेशु० ज्योति०
स्वाहा इदंत्वगादिभ्यो नमम ॥३॥ ओंशिर: पाणिपाद पार्श्वपृष्टोरू
दरजंघाशिश्नोपस्थाप - योमेशुध्यं० ज्योति: स्वा० इदंशिर आदिभ्यो न०
॥४॥ ओंउत्तिष्ठ पुरुष हरिपिंगल लोहिताक्षि देहि देहि ददापयितामे शु०
ज्योति० स्वा० इदं पुरुषादिभ्यो न० ॥५॥ ओंपृथिव्यापस्तेजोवायुराकाशा
मेशु० ज्योति० स्वा० इदं पृथिव्यादिभ्यो न० ॥६॥ ओंशब्दस्पर्शरूपरसगं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धामेशु० ज्योति० स्वा० इदं शब्दादिभ्यो नभम ॥७॥ ओं नमो वाक्कायकर्माणिमे
शु० ज्योति० स्वा० इदं मनआदिभ्यो न० ॥८॥ ओं अव्यक्तभावैरहंकारैर्ज्योति०
स्वा० इदं मवात्मादिभ्यो न० ॥९॥ ओं आत्मामेशु० ज्यो० स्वा० इदमात्मनेनभम०
॥१०॥ ओं अंतरात्मामेशु० ज्योति० स्वा० इदमंतरात्मनेनभम ॥११॥ ओं परमा
त्मामेशु० ज्यो स्वा० इदं परमात्मनेनम० ॥१२॥ ओं क्षुधेस्वाहा – इदं क्षुधेनम०
॥१३॥ ओं क्षुत्पिपासायस्वाहा – इदं क्षुत्पिपासायन० ॥१४॥ ओं विविधैस्वा
० इदं विविधैन० ॥१५॥ ओं ऋग्विधानायस्वाहा – इदं ऋग्विधानायन० ॥१६॥
ओं यजुर्विधानायस्वाहा – इदं यजुर्विधानायन० ॥१७॥ ओं सामविधाना
॥१८॥

पस्वाहा – इदं सामविधानायन० ॥१८॥ ओं अथर्वविधानायस्वाहा – इदं
अथर्वविधानायन० ॥१९॥ ओं कपोत्कायस्वा० इदं कपोत्कायन० ॥२०॥
ओं क्षुत्पिपासामलाज्येष्ठा अलक्ष्मीर्नाशयाम्यहं ॥ अभूतिमसमृद्धिंच
सर्वान्निर्णुदमेपापमानं स्वाहा इदं क्षुत्पिपासादिभ्यो नम० ॥२१॥ ओं अ
न्नमयप्राणमयमनोमयविज्ञानमयानंदमयात्मनेशुध्यं० ज्योति० स्वा०
इदमन्नमयादिभ्यो नमम ॥२२॥ इतिद्वाविंशद्दाहुत्वा विरजाहोमं कृ
त्वा ॥ आज्येन षडाहुतीर्जुहुयात् ॥ ओं अग्नयेस्वाहा – इदमग्न० ॥१॥
इन्द्रायस्वाहा – इदमिन्द्राय० ॥२॥ ओं प्रजापतयेस्वाहा – इदं प्रजापतये० ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओं आत्मने स्वाहा - इदमात्मने न मम ।। ४ ।। ओं अंतरात्मने स्वा० इदमंतरात्मनेन० ।। ५ ।। ओं परमात्मने स्वाहा - इदं परमात्मनेन० ।। ६ ।। ओं ततश्चानुगृहीतमाज्यं गृहीत्वा ।। ओं यदिष्टं यच्च पूर्तं यच्चाप यद्धनायादि प्रजापतौ तन्मनसि जुहोमि विमोहं दैवकिल्बिषात्स्वाहा ।। इदं प्रजापतये न मम ।। १ ।। ततोसमिच्चर्वाज्यैः ओं अग्नयेस्विष्टकृते स्वाहा - इदमग्नयेस्विष्टकृते० ।। ततो भूरादिनवाहूतिं हुत्वा - ओं स्वाहा इति मंत्रेण पूर्णाहुतिं हुत्वा कर्म संस्रवप्राशनादि प्रणीताविमोकांतं कृत्वा-चार्याय दक्षिणां दद्यात् ।। एतत्कर्मसांगतासिध्यर्थं अमुकशर्मणे ब्राम्हणाय इमां धेनुनिष्क्रयदक्षिणां तुभ्यमहं संप्रद

दे न मम ।। ततः पुरुषसूक्तं वेदादींश्च जपेत् ।। ओं सहस्रशीर्षा० देवाः १६ ओं अग्निमीले पुरोहितं० तमं ।।१।। ओं इषेत्वोर्जत्वा० पाहि ।।२।। ओं अग्न आयाहि० रवी ।।३।। ओं शन्नोदेवी० तुनः ।। ४ ।। ततः प्रातःसंध्या साग्निकश्चेद्धोमे च कृत्वा अग्न्युपस्थानं कुर्यात् ।। यद्वा तु रात्रौ भस्मादि स्नानं चेद्द्युनाप्रातः शौचादि मुखप्रक्षालनं स्नानं च कृत्वा कर्म कुर्यात् ।। ओं सं मासिंचंतु मरुतः सामेंद्रः संबृहस्पतिः ।। संमायमग्निः सिंचत्वायुषा च बलेन चायुष्मंतं करोतु मां ।। इत्यग्निमुपस्थाप्य ।। अयंते — नि० रयिं इति मंत्रेण त्रिवारं अग्निं जिघ्रेत् ।। आत्माग्निमध्ये आगच्छ तिष्ठ त्वं निहितो भव ।। अत्राधिष्ठानं कुरु ।। इत्युक्त्वा मुखं विस्तीर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वा ज्यावां प्राशयेत् ।। आत्मन्यग्निं समारोपयेत् ।। ततः हस्तौ पादौ प्र
क्षाल्याचम्य ।। ओं एस्वग्ने सेहष्टा पूर्तेः शरीरमनुसंचरस्व ।। नाहं त्वाम
पहायपरामां मां त्वमपहायपरागां ।। इत्यग्निं विसृजेत् ।। यस्यस्मृत्येति
पठेत् ।। ततः दोरकं कौपीनं काषायवस्त्रं दंडादिकं च गृही— ।। उत्तरनारा
यणसूक्तं अद्भ्यः संभृत इति ष३ ऋ चात्मकं जपन् जलाशयं गच्छेत् ।। नि
ष्क्रमणसमये पुत्रं दृष्ट्वा ऽशिषं दद्यात् ।। सर्वे भवंतु वेदा— सर्वे भवंतु सोम
पाः ।। सर्वे पुत्रमुखं दृष्ट्वा सर्वे भवंतु भिक्षकाः ।। शिवं स्वस्त्यस्तु सर्वेभ्यः ॥
त्वं ब्रह्म त्वं यज्ञस्त्वं लोकस्त्वं सर्व इति ब्रूयात् ।। स पुत्रः पितरं प्रत्याह ।। अहं

ब्रह्माहं यज्ञोहं लोकोहं सर्वमिति ।। यद्यपुत्रश्चेत्तदा स्वयमेव ब्रूयात् ।। अहं
ब्रह्माहं यज्ञोहं लोकोहं सर्वमिति ।। अथापुत्रान्सुहृदो बन्धून्प्रत्याह ।। नमेक
श्चिन्नाहं कस्यचिदिति ।। अथ बंधुविसर्जनं ।। शृण्वंतु सर्वे श्रीगुरुप्रसादा
त्संसारपारमहं गंतुकामोस्मि ।। मया सर्वेषां ममतां त्यक्त्वा पुत्रेष— वित्ते
षणा लोकेषणाश्च त्यक्त्वा युष्माभिर्मोपरि ममता न कर्तव्या विघ्नो न विधे
यः इत्युक्त्वा सर्वं ब्रह्मेति चिंतनीयमिति बंधुविसर्जनं ।। ततो जलाशयं ग
त्वा पूर्णांजलिना जलमादाय अप्रतिरथेना शुः शिशान इत्यनुवाकेनाभि
मंत्र्य ।। ओं सर्वाभ्यो देवताभ्यः स्वाहेति भूमौ निक्षिपेत् ।। ततः हस्तौ पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्दौप्रक्षाल्याचम्य प्राणानायम्येद्देशकालौस्मृत्वा प्राङ्मुखोभूत्वा- ममाशेष दुःखनिवृत्तिनिरतिशयानंदप्राप्तिपरमपुरूषार्थप्राप्त्यै परमहंसाश्रम संन्यास महंकरिष्ये ॥ इतिसंकल्प्य ॥ अपांपूर्णांजलिं गृहीत्वा ॥ ओं एषहवाग्निः सूर्यः प्राणंगच्छ स्वाहा ॥१॥ ओंस्वां योगिंगच्छस्वाहा ॥२॥ ओं अयोवैगच्छस्वाहा ॥३॥ इतिमंत्रत्रयेण पूर्णांजलित्रयं जले क्षिपेत् ॥ पुनः पूर्णांजलिंगृहीत्वा पुत्रेषणावित्तेषणालोकेषणापरित्यक्त्वा अभयंसर्वभूतेभ्यो मत्तः सकाशात्स्वाहा ॥ इत्येकांजलिं जले क्षिपेत् ॥ पश्चात्सर्वंब्रम्हेतिविचिंतयेत् ॥ सर्वंखल्विदंब्रम्हेतिश्रुतेः ॥ पश्चान्मानसंब्रम्हांजलिंकृत्वापठेत् ॥ यत्किंचिद्बंधनं कर्म कृतमज्ञान

॥२१॥

तोमया ॥ प्रमादालस्यदोषोत्थंतत्सर्वंसंत्यजाम्यहं ॥१॥ त्यक्तः सर्वोविशुद्धात्मा गतस्नेहः शुभाशुभाः ॥ कामभोगादिकं सर्वंत्यक्तं चैवमुदाहरेत् ॥२॥ एतत्पदार्थाम्यहं सर्वं कामभोगसुखादिकं ॥ एषंतोषंविवादं चगंधमाल्यानुलेपनं ॥३॥ भूषणंनर्तनंगेयंदानमादानमेवच ॥ नमस्कारंजपंहोमं याश्चानित्याः क्रिया मम ॥४॥ नित्यंनैमित्तिकंकाम्यंवर्णधर्माश्रयाश्चये ॥ गुणधर्माश्चये केचिच्छुभाशुभकुलानिच ॥५॥ करणंकार्यकर्तृत्वंकर्तारंकारणैःसह ॥ सर्वमेवपरित्यज्यबुध्याधिष्ठितमानसः ॥६॥ आत्मानंसर्वभूतस्थंसर्वभूतानिचात्मनि ॥ चतुर्विधस्यसत्रात्माभूतग्रामस्यनिस्पृहः ॥७॥ कृतंचकारितंचैववांछितंचानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोदितं ॥ संचिंत्य सर्वभूतेभ्यो दद्यादभयदक्षिणां ॥८॥ पद्भ्यां कराभ्यां विहर
न्नाहं त्वक्षापमानसेः ॥ करिष्ये प्राणिनां पिंडा प्राणिनः संतु निर्भयाः ॥९॥ देहेज
लेंवरे भूमौ स्थावराजंगमाश्चये ॥ लोमं नस्त्रादि धान्येषु शयनेष्वासनेषु च
॥१०॥ पाषाणे संपुटे चैव श्रुवाविश्लेषकाश्चये ॥ तेस्वयं नु निबुध्यंतु सुखं मत्तोभ
यं विना ॥११॥ दत्वैवं सर्वभूतेभ्यो सर्वत्रामयदक्षिणां ॥ कुरुणो मैत्रवृत्तिश्च प्रज्ञावृ
द्धिश्च संश्रितः ॥१२॥ ततो विचिंतयेद्धीमान्सम्यगात्मनि संस्थितः ॥ कोस्तिमे
कश्चमे नास्ति बुध्यामे कोहमच्युतः ॥१३॥ संसारादित्य तापेन विप्लुष्टे देहमा
नसे ॥ ब्रह्मध्यानांबुशीतेनासिंचभां वाक्य—रिणा ॥१४॥ नमेस्ति बांधवः क

श्चिन्मुक्तात्मानं पराचरं ॥ ममात्मैव परो बंधुरूर्ध्वाधः पृष्ठतोग्रतः ॥१५॥
इंद्रियैर्विषयैः सर्वैर्मध्यांद्यबहि—स्थितैः ॥ विश्वेश्वरो महात्मावै सर्वरूपः सर्वतो
मुखः ॥१६॥ त्यक्तभीरभयं दत्वा सर्वरूपमजमीश्वरं ॥ व्यक्ताव्यक्तं परं शुध्दं स
त्यं संचिंत्य तत्वतः ॥१७॥ एतान्प्रेशान्ब्रुवन्बुध्दो दिशश्चैवावलोकयन् ॥ प्रा
र्थयेच्च ॥ आदित्यचन्द्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं मनश्च अहश्च रात्रि
श्च उभे च संध्ये धर्मोहि जानाति नरस्य वृत्तं ॥ आदित्यचन्द्रमादीन्सर्वकर्मसा
क्षिणः ॥ गुर्वादीन्ब्राम्हणान्संन्याससाक्षिणः भवंतु इत्युक्त्वा साक्षित्वेन ध्यायेत्
॥ ततः नाभिमात्रे जले प्रविश्य प्राङ्मुखः सन् व्याहृतो गायत्री प्रवेशाया इतिसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्प्य ।। ओंभूः व्याहृतौसावित्रीं प्रवेशयामि ।। ओंतत्सवितुर्वरेण्यं ।। ओंभुवः
व्याहृतौ सावित्रीं प्रवेशयामि ।। ओंभर्गोदेवस्यधीमहि ।। ओंस्वः व्याहृतौसा
वित्रीं प्रवेशयामि ।। ओंधियोयोनः प्रचोदयात् ।। ओंभूर्भुवःस्वः व्याहृतौ
सावित्रीं प्रवेशयामि ।। ओंतत्सवि० यात् ।। इत्यन्तं सर्वांत्र्यृचं जपित्वा ।।
ओंपरोरजसेसावदोमितिजपेत् ।। ततोप्रणवेनव्याहृतीं प्रवेशयामि ।।
पृथक्पृथक् ।। ओंभूर्भुवःस्वः प्रणवेनव्याहृतीं प्रवेशयामि ।। इतिगायत्रीप्र
वेशं कृत्वा ।। प्रणवमपमात्मानं ध्यापेत् ।। ततोवक्ष्यमाणमंत्रान्जपेत् ।।
अहं वृक्षस्यरेरिव ।। कीर्तिः पृष्ठगिरेरिव ।। उर्ध्वपवित्रोवाजिनीवस्वमृतमस्मि

।। द्रविणं० वर्चसं ।। सुमेधाअमृतोक्षितः ।। इतित्रिशंकोर्वेदानुवचनं ।।
यश्छंदसामृषभोविश्वरूपश्छंदोभ्योध्यमृतात्संबभूव ।। स मेंद्रोमेधयास्पृ
णोतु अमृतस्यदेवधारणोभूयासं ।। शरीरंमे विचर्षणं ।। जिह्वामेमधुमत
माकर्णाभ्यांभूरिविश्रुवं ।। ब्रह्मणः कोशोसिमेधयापिहितः ।। श्रुतंमेगा
पाय ।। केचिन्मतेएतान्मंत्रान्पठित्वा पुत्रेषणादिपठेत् ।। अन्येषां मतेअ
न्येमंत्राःपठनीयाः ।। ततः पुत्रेषणादिपठेत् ।। तेमंत्राः ।। ओंतरत्समंदी
धावति ।। धारासुतस्यांधसः ।। ओंतरत्समंदीधावति ।। उस्त्रवेदवसूनां
मर्त्यस्यदेव्यवसः ।। ओंतरत्समंदीधावति ।। आपयोस्त्रिंशतंतनासहस्त्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णिदध्महे ।। इति चतुर्ऋचं जपित्वा आदित्यमुपतिष्ठन् ।। पुत्रेषणायाश्च वित्तेष
णायाश्च लोकेषणायाश्च व्युत्थितोहमित्युक्त्वा पाणिना अ — अपोहुत्वोर्ध्वबाहुः
सूर्याभिमुखस्तिष्ठन्प्रैषोच्चारणं कुर्यात् ।। ओंभूः सन्यस्तं मया ।। ओंभुवः
सन्यस्तं मया ।। ओंस्वः सन्यस्तं मया ।। ओंभूर्भुवः स्वः सन्यस्तं मया ।। इ
त्येवं व्याहृतिपूर्वकं प्रैषोच्चारं मंदस्वरेणोक्त्वा पुनर्मध्यमस्वरेणोक्त्वा पुनर्म
ध्यमस्वरेणोक्त्वा पुनरुत्तमस्वरेणोच्चरेदेवं मंदमध्यमोत्तमस्वरेण त्रिवारं प्रै
षमंत्रमुक्त्वा ।। ओं अभयं सर्वभूतेभ्यो मत्तः स्वाहा — इति मंत्रेण प्राच्यां दिशि अ
पां पूर्णांजलिं क्षिपेत् ।। ततः शिखार्थं पंचसप्त वा स्थापितान्केशान् तूष्णीं उत्पा

॥२८॥

ट्य यज्ञोपवीतं कंठादुद्धृत्य अच्छिन्नं हस्ते गृहीत्वा ।। वेदांतविज्ञान सुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्वाः ।। ते ब्रम्हलोके तु परांतकाले परामृतात्परिमुच्यं
ति सर्वे ।। इति मंत्रेण केशान् यज्ञोपवीतं च संमर्द्य एकीकृत्य प्रक्षाल्य हस्ताभ्या
मुदकांजलिं गृहीत्वा ।। ओं आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वा
हा ।। ओंभूः स्वाहा इति मंत्रेण अ — जलैः सह उपवीतं जुहुयात् ।। ततो विष्णुप्रार्थ
ना ।। यमः ।। दत्वा तोयांजलिं विप्रो भक्त्या संप्रार्थयेद्धरिं ।। सर्वदेवात्मके तोये
तोयाहुतिमहं करे ।। दत्वा सर्वेषणां त्यक्त्वा युष्मच्छरणमागतः ।। त्राहि मां स
र्वलोकेश गतिरन्या न विद्यते ।। सन्यस्तं मे जगन्नाथ पाहि मां मधुसूदन ।। त्राहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांसर्वलोकेशवासुदेवसनातन ॥ सन्यस्तं मे जगद्योने पुंडरीकाक्ष मोक्षद ॥ अ
हं सर्वाभयं दत्वा भूतानां परमेश्वर ॥ युष्मच्छरणमापन्नस्त्राहि मां मधुसूदन ॥ पु
रुषोत्तम ॥ ततो जलांते भूमौ उदङ्मुखः सन् वासः कटिसूत्रादिकं त्यक्त्वा यथाजा
तरूपोधरो दिगंबरः भूत्वा जलाद्बहिर्भूमावुदङ्मुखः प्राङ्मुखः प्राचीमुदीचीं वा दिशं
पंच सप्त पदानि गच्छेत् ॥ अथाचार्यो वान्यो वा ब्राम्हणः गच्छतं यतिं दंडब्रह्माणि य
त्य भो भगवन् तिष्ठ तिष्ठेत्युक्त्वा निवार्य अतिप्रियवचनैर्लौकिकव्यवहारार्थं लज्जानिवा
रणार्थं कौपीनाच्छादनवासः काषाययुक्तं ग्राह्यं ॥ गोसर्पनिवारणार्थं दंडो धार्य
इत्युक्त्वा कौपीनादिकं दद्यात् ॥ ततः आचार्यदत्तं कौपीनं दोरकं कंथादिकं स्वीकृ

॥२५॥

त्य क्रमेण स्वयं प्रत्येकं प्रणवेन गृहीत्वा कट्यां दोरकं बध्वा कौपीनं परिधायाचम्य
॥ दंडं प्रार्थयेत् ॥ ओं इंद्रस्य वज्रोसि वार्त्रघ्नः शर्म मे भव ॥ यत्पापं तन्निवारय ॥
विष्णुहस्ते यथा चक्रं शूलं त्रिनेत्रके यथा ॥ इन्द्रहस्ते यथा वज्रं तथा दंड भवाद्य मे ॥ इ
ति दंडं प्रार्थयेत् ॥ सखा मां गोपाय ॥ ओं इत्यनेन दक्षिणहस्तेन दंडं गृहीत्वा - ओं प्र
णवेन कमंडलुं च गृह्णीयात् ॥ ततो यावद्गुरु समीपे गमनं तावद्विष्णुस्मरणप
रो भवेत् ॥ ततः दंडकमंडलुवस्त्रयुक्तो आम्रपल्लवान् गृहीत्वा गुरुसमीपं गत्वा
दक्षिणजानुभूगतं कृत्वा पल्लवानग्रे प्रागग्रान्स्थाप्य पादांबुपसंगृह्य नमस्कृत्य
गरुड आसनेनोपविश्य करौ संपुटीकृत्य ॥ गुरुं प्रार्थयेत् ॥ श्रीगुरो भगवन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्माद्घोरात्संसारान्मामुध्दर ।। असकृद्गर्भवासजन्ममरणादिनयाद्दात्मश्चा
नेनमांतारय ।। भूतानामभयंदत्वायुष्मच्छरणमागतः ।। त्राहिमांयोगीनामी
शानान्यस्त्रातास्तिमेप्रभो ।। १ ।। निस्पृहः सर्वतः शांतः सर्वविद्याविशारदः ।।
सर्वसंशयसंछेत्ता नलसोगुरूराडपं ।। २ ।। तस्माद्गुरूंप्रपद्येताजिज्ञासुःश्रेयमु
त्तमं ।। शाब्देपरेच्चनिष्णातंब्रह्मण्युपसमाश्रयं ।। ३ ।। त्रायस्वभोजगन्नाथगुरो
संसारवन्हिना ।। दग्धमांकालदष्टंच त्वामहंशरणंगतः ।। ४ ।। अद्यप्रभृतिभू
तानिनाहिंस्यामिकदाच्चन ।। महाव्रतंकरिष्यामिकर्मणामनसागिरा ।। ५ ।।
अविद्याकृष्णसर्पेणदष्टंतद्विषपीडितं ।। त्वद्वाक्यामृतपानेनसंजीवयपुनर्मृतं

।। ६ ।। इतिगुरूंप्रार्थ्य ।। गुरोर्दक्षिणपादंस्वदक्षिणहस्तेनगुरोर्वामपादंस्ववामह
स्तेनधृत्वापठेत ।। योब्रह्माणंविदधाति पूर्वंयोवैवेदांश्चप्रहिणोस्मै ।। तंहदेवमा
त्मबुध्दिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये ।। इतिमंत्रेणगुरूंभगवद्बुध्द्योपस्थाप
।। संसाराग्निनिविष्टोहंविष्णुस्त्वंदेहभानसैः ।। ब्रह्मध्यानांबुशीतेनासिंचमांवाक्य
वारिणा ।। १ ।। नमेस्तिबांधवः कश्चिन्मुक्त्वात्मानंपरावरं ।। ममात्मैवपरोबंधुरू
र्ध्वाधः पृष्ठतोग्रतः ।। अधीहिभगवोब्रह्मेतिब्रूया ।। ततःप्राङ्मुखोगुरूरद्वैतस
च्चिदानंदस्वरूपमात्मानमेवानुसंधायजलपूर्णशंखपुष्पादिभिरभ्यर्च्यद्वाद
शप्रणवैरभिमंत्र्यतेनोदकेनद्वादशप्रणवेनउदङ्मुखस्यशिष्यस्यशिरोभिषिंचेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः शांतिपाठं शन्नोमित्र इत्यादिपठित्वाशिष्यस्यशिरसिदक्षिणहस्तंदत्वापु
रूषसूक्तंजपेत् ।। ततोदक्षिणकक्षांतरेणहस्तंशिष्यस्यहृदयेनिधाय ।। मम
व्रतेतेहृदयंदधामिममाचित्तमनुचितंतेअस्तु ।। ममवाचमेकमनाजुषस्वबृ
हस्पतिस्त्वानियुनक्तुमह्यं ।। इतिजपेत् ।। ततोउदङ्मुखस्यशिष्यस्यदक्षिणकर्णे
नित्यशुध्दबुध्दपरमानंदाद्यपब्रम्हप्रतिपादकं प्रणवंगुरुः प्राङ्मुखः सन्नुपदिशेत्
।। यथाप्रणवस्यांतर्यामिऋषिः दैवीगायत्रीछंदः परमात्मादेवता ओं बीजं ओं
शक्तिः मं कीलकं मोक्षार्थं जपेविनियोगः ।। प्रणवेनकरन्यासमंगन्यासंच शि
ष्यस्यांगेकृत्वाप्रणवंत्रिरुपदिशेत् ।। प्रणवस्यार्थमाचार्योबोधयेत् ।। पं

।।२७।।

चीकृतपंचभूतेत्यादिना ।। ततोमहावाक्यानुपदिशेत् ।। प्रज्ञानंब्रम्हेतिऋ
ग्वेदे ।। सपश्चात्पुरुषोपश्चासावादित्यसएकः ।। यजुर्वेदे ।। सत्यंज्ञानमनंत
ब्रम्हेतितैत्तिरीये ।। अहंब्रम्हास्मिवाजसनीये ।। तत्वमसिसामवेदे ।। अयमा
त्माब्रम्ह अथर्ववेदे ।। ज्ञानवेदानिशिष्यशाखावान्यापदेशापूर्वकमुपदिशेत् ।। ए
षामर्थंचबोधयेत् ।। ततोनामदद्यात् ।। वेसनाम ।। अथवासर्वसंमतेनयद्रोच
तेतन्नाम ।। नशिष्यबुध्दिपूर्वकंकदाचन ।। तत्रसंप्रदायः ।। तीर्थाश्रमसंप्रदाये
नब्रम्ह ।। आनंदब्रम्ह अद्वैतब्रम्हेत्यादि ।। वनारण्ये आनंदः ।। अद्वयानंदः ।।
पूर्णानंदादि ।। गिरिपर्वतसागरेषुचैतन्यं ।। राघवचैतन्यंकेशवचैतन्येत्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सरस्वतीभारतीपुरीपुआभुदेवस्वरूपनारायणस्वरुपेत्यादि ॥ केचिन्मतेगो
विंद - श्रीपाद - विष्णु - श्रीपादेति - अन्येरामामृत - कृष्णामृतेति - एवंसंप्रदाय
मतेननामपूर्वकंकुर्यात् ॥ ततः गुरुः शिष्यायपरमहंसधर्मानुपदिशेत् ॥ ततः
गुरुः शिष्यंपरीक्ष्यतस्यअधीतविद्यस्यपर्यंकाशौचंकारयित्वायोगपट्टंकुर्या
त् ॥ योगपट्टंविनासंन्यासदानेअधिकारोनास्ति॰ अथपर्यंकाशौचंप्रकारः॥
वामस्थानेवामेभ्यांगतपादाभ्यांस्वहस्तार्थंचदक्षिणेमृद्धिभागंविभज्याधग
रूआसनसंस्थितः ॥ पादयोश्चमृदः पंचचतस्त्रस्तिस्रएवच ॥ द्वेचैकांचमृदंद
द्याज्जानुजंघादितःक्रमात् ॥२॥ करयोर्दशसप्ताद्यौद्वितीयेसप्तपंचच ॥ तृ
॥२८॥

तीयेषट्चतस्रश्चतिस्रोद्वेच-चतुर्थके ॥३॥ द्वेचैकांचमृदंदद्यात्शौचेपर्यंक
संज्ञके ॥ अथप्रयोगः प्रथमंशिष्येनगुरुज्येष्ठाहीनजुटीबंधनंकुर्यात् ॥
तद्गुरुः संप्रदायेनबोध्यं ॥ ततोगुरुणाप्रेरितेकश्चिद्ब्राह्मणः गृहस्थोवाशुद्धश्च
मृदमाहायपत्रावल्यांद्वौभागौकृत्वा अरत्निमात्रंपीठंस्थापयित्वातस्मिन्प्रा
ङ्मुखंशिष्यमुपस्थाप्यतस्यदक्षिणभागेमृत्तिकायाएकंभागंपंचधाविभज्य
प्राक्संस्थंनिधायद्वितीयंभागंपंचधाविभज्यप्राक्संस्थंशिष्यकार्यमेकंब्राह्म
णंपरिकल्प्यकर्तातत्पुरतोगर्वासनेनोपविश्यगृहस्थश्चेत्साष्टांगंप्रणम्यअ
नुज्ञांगृहीत्वाप्राङ्मुखः सन्देशकालौसंकीर्त्यगुर्वाज्ञयाअभ्यागतायपत्तये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्यंकाशौचं करिष्ये इति संकल्प्य प्रत्यङ्मुखो तत्पुरतो भूत्वा शिष्य दक्षिण भाग
स्य पूर्वनिहित पंच मृत्पिंड मध्ये प्रथम पिंड भागेन पंच वारं तत्रस्थ मृज्जलाभ्यां
अभ्यागत जानुनी युगपत्स्वौ दक्षिण वाम कराभ्यां क्षालयेत्॥ पंचमे मृत्स
माप्ति॥ ततः कर्ता स्वहस्त प्रक्षालनार्थं शिष्य वाम भागस्थ मृत्पिंड पंचके षु प्र
थम मृत्पिंडस्यार्द्धं भागेन स्व वाम करं दशवारं तत्रस्थ जलेन प्रत्येकं प्रक्षाल्य अ
वशिष्टार्द्धेन भागेन उभय करौ सप्तवारं तेनैव जलेन प्रक्षालयेत्॥ इति प्रथमा
वृत्तिः॥ एवं अन्यत्रापि बोध्यं॥ संख्यायां विशेषः॥ ततो शिष्य दक्षिण भाग
स्य द्वितीय मृत्पिंडेनाभ्यागत युगपच्चतुर्वारं द्वे जंघे तेनैव जलेन प्रक्षाल

॥२८॥

येत्॥ ततो यति वाम भागस्य द्वितीय मृत्पिंडार्द्धेन स्व वाम करं सप्तवारं प्र
क्षाल्यावशिष्टार्द्धेन उभौ करौ पंच वारं तत्रस्थ जलेनैव प्रक्षालयेत्॥ एवं
द्वितीयावृत्तिः॥ पुनः यति दक्षिण भागस्थ तृतीय मृत्पिंडेनाभ्यागतस्य गु
ल्फौ त्रिवारं प्रक्षाल्य यति मृत्पिंडार्द्धेन स्व वाम करं पंचवारं प्रक्षाल्याव
शिष्टार्द्धेन उभौ करौ चतुर्वारं क्षालयेत्॥ इति तृतीयावृत्तिः॥ ततो यति
दक्षिण भागस्य चतुर्थ मृत्पिंडेनाभ्यागत पाद पृष्ठौ द्विवारं प्रक्षाल्य वाम
भागस्य चतुर्थ मृत्पिंडार्द्धेन स्व वाम करं त्रिवारं प्रक्षाल्यावशिष्टद्वितीयार्द्धे
नोभौ करौ द्विवारं क्षालयेदिति चतुर्थावृत्तिः॥ पुनः यति दक्षिण भागस्य पं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चमृत्पिंडेनाभ्यागतयादत्तले एकवारं प्रक्षाल्यपतिवामभागस्थपंचभमृ
त्पिंडार्धेनस्वनामकरं द्विवारं प्रक्षाल्यावशिष्टार्धेनोभौकरौ एकवारं प्र
क्षालयेत् ॥ इतिपर्यंकशौचविधिः ॥ ततोमृज्जलाभ्यांस्वयमभ्यागतः
पीठाद्यवेवास्थितः सन्कटिशौचंविधायाचम्य० अतःपरं प्रणवेनैवाच
मनप्राणायामादिकुर्यात् ॥ प्राणानायम्य कौपीनं वस्त्रंचाविसृज्यनू
तनंप्रणवेनगृहीत्वाद्विगुणं कटिसूत्रंबध्वा कौपीनंपरिधायान्यद्वस्त्रे
णावगुह्याचम्यप्राणानायम्यगुर्वनुज्ञयापादुकाभ्यांगृहंप्रवृज्यपूर्व
मेवकल्पितेउच्चासनेगुर्वनुज्ञयोपविश्यसभ्यैःसहवेदांतेकिंचिदुप

॥३०॥

न्यसेत् ॥ ततःगुरुणापूर्ववत् शंखपूजांकृत्वा विधिवत्प्रणवन्यासपूर्वकंशं
खेनाष्टोत्तरशतवारं प्रणवेनशिरोभिषिच्य वस्त्रगंधमाल्यधूपदीपनाना
नैवेद्यैः संपूज्यस्तोत्रादिपठेत् ॥ ततोघंटादिवाद्यपुरःसरं वस्त्रंशिष्योपरि
संधार्यबंधुभिर्यतिभिःसभ्यैःसह विश्वरूपाध्यायंपश्यामिदेवानित्या
दिजित्वाशत्रून्भुंक्ष्वराज्यंसमृद्धं इत्यंतंपठित्वापूर्वमेव कल्पितंशिष्याय
नामदद्यात् ॥ ततोगुरुः शिष्यंप्रत्याह ॥ अद्यप्रभृतित्वया संन्यासाधि
कारिणः सम्यक्परीक्ष्य संन्यासोदेयः दीक्षाव्याख्यानंचयोगपट्टश्चदेयः ॥
इत्याज्ञांगुरुणादत्तां शिरसाशिष्यः स्वीकुर्यात् ॥ ततोगुरुः कटिसूत्रंपंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुद्रालंकृतंदंडंचाशीष्यायदत्वायथासंप्रदायेनशीष्यमभिवंदयेदन्येयतयो
गृहस्थाद्याश्चनमस्कुर्वंति ॥ शीष्योनारायणेत्युक्त्वात्तदासनादुत्थायउ
च्चासनेगुरूमुपवेशयीत्वापुष्पैरभ्यर्च्यंयथोपदेशोजुटीपादग्रहणादिवं
धनंकुर्यात् ॥ अन्येषांयतीनांचकुर्यात्क्षमापयेदिति ॥ ततः ब्राम्हणे
भ्योगंधंदक्षीणांयतीभ्योप्रसादंदत्वाशांतिपाठंबिष्णुसूक्तंचपठेदिति
संप्रदायः ॥ सन्यासग्रहणानंतरंब्राम्हणैःसहपारणामकर्तव्या ॥
इतिविधुराणांनिरग्निकानांचविधिसंन्यासपरमहंसाश्रमसंन्यास
ग्रहणपध्दतिः ॥ अथातुरसंन्यासप्रयोगः ॥

॥३१॥

॥ चरेच्चत्वारिकृच्छाणि यावनार्थमनाश्रमी ॥ आश्रमीचेत्कृछ्रमे
कंतेनासौयोग्यतांव्रजेत् ॥ शक्तःश्चेत्स्नात्वा संभवेभस्मनास्ना
त्वा आचम्यप्राणानायम्यदेशकालौस्मृत्वा ॥ अमुकशर्मणोमम
करिष्यमाणसंन्यासयोग्यतासिध्यर्थंचतुःकृछ्रात्मकंकृच्छ्रमेकंवा
प्रायश्चित्तंप्रातिकृच्छ्रमेकैकगोनिष्क्रयामुकपरिमितंद्रव्यद्वाराअहमा
चरिष्ये ॥ इतिसंकल्प्यतद्द्रव्यंब्राम्हणेभ्योदत्वापुनःदेशकालौसंकी
र्त्य–ममाशेषदुःखनिवृत्तिनिरतिशयानंदप्राप्तिपरमपुरुषार्थप्राप्त्यै
परमहंसाश्रमसंन्यासमातुरविधिनाहंकरिष्ये ॥ तदंगवपनंकरिष्ये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिसंकल्प्य शिखावर्जं पंचसप्तवाकेशान्स्थापयित्वा — नखसहितं वपनं क
क्षोपस्थवर्जं कृत्वा यथाविधिस्नात्वा शक्तश्चेद्दशविधस्नानादि कृत्वा यथा
शक्ति संध्यातर्पणादि कृत्वा अग्न्युपासनं कृत्वा आत्मन्यग्निं समारोप्याहि
तश्चेत्प्राजापत्येष्टिस्थाने पूर्णाहुतिं हुत्वा श्रौताग्निं समारोप्य संन्यसेत् ॥
विधुरनिरग्निकब्रम्हचारीस्नातकानामग्नेरभावात्समारोपो नास्ति ॥ उत्सृ
ष्टाग्न्यनुगताग्नीनामाध्यानकालाद्संभवात्समारोपो नास्ति ॥ संभवे तु क
र्तव्यमेव ॥ ततः कौपीनाच्छादनाद्युपयुक्तं संपाद्य यथाविहितं दंडमष्टो
त्तरशत प्रणवेन पुरुषसूक्तेनाभिषेकं कृत्वा स्थाप्य शक्तश्चेत्पयां सभीपेग

त्वांजलिना — त्यजले जुहुयात् ॥ अशक्तश्चेत् गृहे पात्रद्वये जलं स्थाप्यैक
स्मात्पात्राद्दक्षिणहस्तेन जलं गृहीत्वा द्वितीयपात्रे जुहुयात् ॥ ओं एष ह
वाऽग्निः सूर्यः प्राणं गच्छ स्वाहा ॥ स्वां योनिं गच्छ स्वाहा ॥१॥ इत्येकाहुतिः ॥
ओं आपो वै गच्छ स्वाहा ॥२॥ इति जले आहुतिद्वयं हुत्वा पूर्णांजलिना जलं
गृहीत्वा ॥ ओं पुत्रैषणा वित्तैषणा लोकैषणा मया परित्यक्ता अभयं सर्वभूते
भ्यो मत्तः सकाशात् स्वाहा इत्यनेन जले क्षिपेत् ॥ ततः पात्रस्य हुतशेषं तोयमा
पुः शिशान इत्यनुवाकेनाभिमंत्र्य पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणा
याश्च व्युत्थितोहं स्वाहेति तदुदकं किंचिद्धस्तेनादाय पिबेत् ॥ ततोंजलिनान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जलंगृहीत्वा चतुर्दिक्षु पूर्वादित्तस्तूष्णींक्षिपेत् ।। ततः गायत्रीप्रवेशंकुर्यात् ।।
ओंभूः व्याहृतौसावित्रींप्रवेशयामि ।। ओंतत्सवितुर्वरेण्यं ।। ओंभुवः व्याहृ
तौसावित्रींप्रवेशयामि ।। ओंभर्गोदेवस्यधीमहि ।। ओंस्वः व्याहृतौसा
वित्रींप्रवेशयामि ।। ओंधियोयोनः प्रचोदयात् ।। ओंभूर्भुवः स्वः व्याहृ
तौसावित्रींप्रवेशयामि ।। ओंतत्सवितु० यात् इत्यन्तंपठित्वापरोरजसेसा
वदोमितिपठेत् ।। ओंभूः प्रणवेव्याहृतींप्रवेशयामि ।। ओंभुवः प्रणवेव्याहृतीं
प्रवेशयामि ।। ओंस्वः प्रणवेव्याहृतींप्रवेशयामि ।। ओंभूर्भुवः स्वः प्रणवेव्या
हृतींप्रवेशयामि ।। एवंगायत्रीप्रवेशंकृत्वोर्ध्वबाहुः सूर्याभिमुखोभूत्वाप्रै

षोच्चारंकुर्यात् ।। ओंभूः सन्यस्तंमया ।। ओंभुवः सन्यस्तंमया ।। ओं
स्वः सन्यस्तंमया ।। ओंभूर्भुवः स्वः सन्यस्तंमया ।। इतिप्रैषोच्चारंउपां
शुमध्यमोच्चैः स्वरेणत्रिवारंब्रूयात् ।। अभयंसर्वभूतेभ्योमत्तः स्वाहेति
प्राच्यांदिश्युदकांजलिंदद्यात् ।। ततः तूष्णींशिखार्थंपंचसप्तवाकेशानुत्पा
ट्ययज्ञोपवीतमपिकंठादुद्धृत्य अच्छिन्नमेवैकीकृत्यप्रक्षाल्य ओंअपोवै
सर्वादेवताः सर्वाभ्योदेवताजुहोमिस्वाहा ।। ओंभूः स्वाहाइत्यप्सुजलैःस
होपवीतंजुहुयात् ।। ततः उदङ्मुखः वस्त्रादिकंत्यक्त्वायथाजातरूपोदिगंबरो
भूत्वापंचसप्तपदानिगच्छेत् ।। गच्छतमाचार्याः प्रियवचनेनभोभगवन्लो

कलज्ञानिवारणार्थं वासोग्राह्यं गोसर्पनिवारणार्थं दंडोधार्यः ॥ जलपाना
र्थं कमंडलुश्च ग्राह्य इत्युक्त्वाद्द्यात् ॥ यतिः आचार्यहस्तात्प्रणवेन गृहीत्वा
कोपीनादिकं परिधायाचम्य दंडं प्रार्थयेत् ॥ ओं इन्द्रस्य वज्रोसि वार्त्रघ्नः
शर्म मे भव ॥ यत्पापं तन्निवारय ॥ विष्णुहस्ते यथा चक्रं शूलं शिवकरे यथा
॥ इन्द्रहस्ते यथा वज्रं तथा दंड भवाद्य मे ॥ इति प्रार्थ्य ॥ सखा मां गोपाय
॥ ओं इत्यनेन दंडं गृहीत्वा ॥ ओं कमंडलुं गृहीत्वा गुरुसमीपं गच्छेत् ॥ अ
शक्तश्चेत्तत्रैव गुरुः ॥ जलपूर्णं शंखं पुष्पादिभिरभ्यर्च्य दद्यात्प्रणवैरभिमं
त्रितेनोदकेन प्रणवेन शिष्यशिरोभिषिंचेत् ॥ ततः उदङ्मुखस्य शिष्यस्य

॥३४॥

दक्षिणकर्णे नित्यशुध्दबुध्दपरमानंदाद्वयब्रम्हप्रतिपादकं प्रणवं गुरुः प्राङ्मु
खः सन्नुपदिशेत् ॥ शिष्यशाखापूर्वकं महावाक्यान्युपदिशेत् ॥ ततः पुत्रा
दिर्ब्राम्हणेभ्यो गंधं दक्षिणां च दद्यादिति ॥ अशक्तश्चेत्कृच्छ्रसंकल्पः ॥ स
न्यासग्रहणसंकल्पः ॥ क्षौरस्नानमारण — होमतोयप्राशन सावित्रीप्रवेश
प्रैशोच्चार शिखासूत्रत्याग कोपीनधारणांतमेव पूर्ववत्यनुसारेण कर्म कुर्या
दिति ॥ अतऊर्ध्वं पुत्रग्रहं न गच्छेत् ॥ अत्यंतमातुरश्चेत्प्रैषमात्रं वावेदेत् ॥
उत्पन्ने संकटे घोरे चोरव्याघ्रादिगोचरे ॥ भयाक्रांतस्य संन्यासमांगिरा मुनिर
ब्रवीत् ॥ आत्रिः ॥ आतुराणां विशेषोस्ति न विधिर्नैव च क्रिया ॥ प्रैषमात्रेण सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यास आतुराणां विधीयते ॥२॥ संन्यस्तमितियोब्रूयात्प्राणैः कंठगतैरपि ।
साभित्वामंडलं भानो परंब्रह्माधिगच्छति ॥३॥ यद्यासोपिजीवातिचेत्तदास्वस्थः
सन्दंडादिकंसर्वं गृहीत्वा महावाक्योपदेशार्थंसद्गुरुमुपसाद्य महावाक्योपदेशं
लब्ध्वा कर्मसन्यासविध्युक्ताचारेण वर्तेतस्वकर्मनिष्ठोभवेदिति ॥ उपदेशं वि
नातदानीमेवमरणं यतिसंस्कार विधिनैवसंस्कारं कृत्वा ॥ पार्वणश्राद्धं ना
रायणबलिं आराधनादि कुर्यात् ॥ इत्यातुर संन्यासप्रयोगः ॥ अथातुर
संन्यासविधौ मूलवाक्यानि लिख्यंते ॥ आंगिरः ॥ सोमयाजी भवेत्प्राजा
पत्यां वैश्वानरीं तथा ॥ ऐंधात्तवीपामिक्ष्वावासर्वदेवसदक्षिणां ॥१॥

यद्यशक्तोभवेदाहवनीये जुहुयाद्बुधः ॥ देवतायै प्रधानायै पूर्णाहुतिमनु
त्तमां ॥२॥ असौस्वर्गायलोकायस्वाहेति ज्वालयेत्ततः ॥ पात्राणि मृन्मया
नां तु प्रक्षेपस्तु विधीयते ॥३॥ अयंते योनिरित्याभ्यां मामन्याग्निं समापये
त् ॥ ततस्त्वातुर संन्यासं कुर्याद्देवविधानतः ॥४॥ गत्वोदकसमीपं तु
पात्रयोरपमुद्धरेत् ॥ तयोरेकं करेणाथ गृहीत्वा दक्षिणेनवै ॥५॥ अत्रैवेव
त्वेषहवाग्निर्मंत्राभ्यां जुहुयात्सुधीः ॥ पुत्रैषणाभयं द्वाभ्यां तृतीयाहुतिं हुने
त् ॥६॥ कृत्वाहुतित्रयं पश्चात्पात्रस्थाहुतिशेषकं ॥ आशुःशिशानोवृषभो
नुवाकेनामुमंत्रयेत् ॥७॥ पुत्रैषणेति मंत्रेणा तद्गृहीत्वा पिबेज्जलं ॥ द्विती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमभयंसर्वेष्वैवमुक्तापिबोद्विजः॥८॥ ओंभूर्भुवःस्वरितिचपिबेच्छेषंतृतीयकं
॥आदायांजलिनातोयमन्यत्प्रातिदिशांक्षिपेत्॥९॥ प्रणवेतुप्रकुर्वीतिसावि
त्र्याश्चप्रवेशयेत्॥ आदित्याभिमुखोभूत्वाचोर्ध्वतृबाहुरतंद्रितः॥१०॥
सन्यस्तोहमिमंमंत्रांत्रिवारंअभ्यसेद्बुधः॥अतःपरंगृहंवर्ध्यून्नगच्छेद्भिक्षु
कोभवेत्॥११॥ मृतेतुप्राक्षिपेद्भूमौउदकेवायथाविधि॥उक्तआतुरसं
न्यासोमुनीनांगिरसास्वयं॥१२॥इत्यंगिरसोक्तआतुरसंन्यासवा
क्यानि॥इतिदेवनाथेनरचितापरमहंसाश्रमसंन्यासग्रहणपध्दतिः
समाप्ता॥यस्यकृपाकटाक्षेण कृतेयंपध्दतिर्मया॥पारिश्रमेणमेदेवोप्री

भवतुसर्वदा॥ अथप्रसंगात्संन्यासग्रहणमुहूर्तानिलिख्यंते॥
त्तरायणेसूर्येगेशुक्लपक्षशुभःस्मृतः॥पंचम्यंतःकृष्णपक्षेपरिक्तातिथिविवर्जि
तः॥अमांपूर्णांप्रतिपदंसप्तमींचत्रयोदशीं॥क्षयातिथिंप्रदोषंचअष्ठमीं
चाविवर्जयेत्॥२॥विशाखाकृत्तिकाज्येष्ठाभरणीचमघातथा॥वर्जान्ये
तानिऋक्षाणिशेषाणिशुभदानिच॥३॥संक्रांतिंवैधृतिंव्यतिपातंशानिं
भद्रांविवर्जयेत्॥चंद्रताराअनुकूलेचसन्यासग्रहणंशुभं॥महावाक्योपदेश
श्चयोगपथ्यशुभःस्मृतः॥इतिमुहूर्तानि॥भाद्रपदेमासेकृष्णपक्षेएकादश्यांमं
दवासरेसं.१९७२॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुध्दमशु
ध्दंवाममदोषोनदीयतां॥इतिकंठाळेइत्युपनामकबाळकृष्णेनलिखिता॥
॥शुभमस्तु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिसन्यासपध्दतिः ।।

स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.09.19 16:42
,TRANSFERRED=2019/09/16 at 16:52:10
,PAGES=40
,TYPE=STD
,NAME=S0001862
,Book Name=M-655-SANYAS PADHHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection